www.sgbauonline.com

AU–2111

# M.A. (Part—I) (Old) Examination

## SANSKRIT

## Paper—IV

## (Poetics & Aesthetics)

समयः — होरात्रयम्] [परीक्षाङ्काः — 100

**सूचना :—** उत्तराणि स्वीकृतमाध्यमेन लिखत।

(काव्यचिन्तकाः)

1. काव्यसिद्धान्तचिन्तकद्वयस्य काव्यसिद्धान्तौ स्पष्टीकुरुत — 20

(1) भामहः

(2) आनन्दवर्धनः

(3) मम्मटः

(4) पं. जगन्नाथः।

(नाट्यशास्त्रम्)

2. कस्यापि एकस्य सविस्तरम् उत्तरं लिखत। भरतमुनये नाट्यवेदस्य प्राप्तिः कथमभवत् ? विस्तारेण लिखतु। 10

अथवा

भरतमुनिमनुसृत्य नाट्यगृहस्य वर्णनं कुरुत।

अथवा

टिप्पणीद्वयं लिखत —

(1) अष्टपदानान्दी

(2) इंद्रध्वजमहोत्सवः

(3) नाट्यवेदस्य रचना

(4) अभिनेतृगुणाः।



www.sgbauonline.com

www.sgbauonline.com

(मृच्छकटिकम्)

3. श्लोकत्रयाणां ससंदर्भानुवादं कुरुत — 15

(1) दारिद्रयात् पुरुषस्य बान्धवजनो वाक्ये न सन्तिष्ठते,
सुस्निग्धा विमुखी-भवन्ति सुहृदः स्फारीभवन्त्यापदः।
सत्त्वं ह्लासमुपैति, शीलशशिनः कान्तिः परिम्लायते,
पापं कर्म च यत् परैरपि कृतं तत्तस्य सम्भाव्यते।।

(2) उत्कण्ठितस्य हृदयानुगुणा वयस्था
सङ्केतके चिरयति प्रवरो विनोदः।
संस्थापना प्रियतमा विरहातुराणां
रक्तस्य रागपरिवृद्धिकरः प्रमोदः।।

(3) प्रियसुहृद्रमकारणे गृहीतं
रिपुभिरसाधुभिराहितात्मशङ्कैः।
सरभसमभिपत्य मोचयामि
स्थितमिव राहुमुखे शशाङ्कबिम्बम्।।

(4) आलोकितं गृहशिखण्डिभिरुत्कलापैः
हंसैर्यियासुभिरपाकृतमुन्मनस्कैः।
आकलिकं सपदि दुर्दिनमन्तरिक्ष–
मुत्कण्ठितस्य हृदयञ्च समं रुणद्धि।।

(5) छन्नं कार्यमुपक्षिपन्ति पुरुषा न्यायेन दूरीकृतं
स्वान् दोषान् कथयन्ति नाधिकरणे रागाभिभूताः स्वयम्।
तैः पक्षापरपक्षवर्द्धितबलैर्दोषैर्नृपः स्पृश्यते
संक्षेपादपवाद एव सुलभो द्रष्टुर्गुणो दूरतः।।

4. एकस्य प्रश्नस्य सविस्तरमुत्तरं लिखतु। शूद्रकस्य जीवनपरिचयं लिखतु। 15

अथवा

शर्विलक-मदनिकासंवादं लिखतु।

अथवा



www.sgbauonline.com

www.sgbauonline.com

टिप्पणीद्वयं लिखत —

(1) दुर्दिनम्

(2) दारिद्र्य वर्णनम्

(3) धूता

(4) शकार:

(5) संवाहक:।

(शिशुपालवधम्)

5. (अ) श्लोकत्रयाणां विवरणात्मकानुवादं कुरुत — 12

(1) विहङ्गराजाङ्गरुहैरिवायतैर्हिरण्मयोर्वीरुहवल्लितन्तुभि:।
कृतोपवीतं हिमशुभ्रमुच्चकैर्धनं घनान्ते तडिताङ्गणैरिव।।

(2) स तप्तकार्तस्वरभास्वराम्बर: कठोरताराधिपलाञ्छनच्छवि:।
विधिद्युते वाडवजातवेदस: शिखाभिराश्लिष्ट इवाम्भसां निधि:।।

(3) अभूदभूमि: प्रतिपक्षजन्मनां भियां तनुजतपनद्युतिर्दिते:।
यमिन्द्रशब्दार्थनिषूदनं हरेर्हिरण्यपूर्वकशिपुं प्रचक्षते।।

(4) हृदयमरिवधोदयादुदूढद्रढिम दधातु पुन: पुरन्दरस्य।
धनपुलकपुलोमजाकुचाग्रद्रुतपरिरम्भनिपीडनक्षमत्वम्।।

(5) करोति कंसादिमहीभृतां वधाज्जनो मृगाणामिव यत्तव स्तवम्।
हरे ! हिरण्याक्षपुर: सुरासुरद्विपद्विष: प्रत्युत सा तिरस्क्रिया।।

(ब) टिप्पणीद्वयं लिखत — 8

(1) गजासुर:

(2) नारदस्यशरन्मेघसदृश्यवर्णनम्

(3) श्रीकृष्णकृता नारदप्रशंसा

(4) सांख्यानुसारेण पुरुषचतुष्टय:।



www.sgbauonline.com

www.sgbauonline.com

6. केषाञ्चित् **चतुर्णां** सविवरणम् अनुवादं कुरुत — 20

(1) काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्व–
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।
केचिद्वाचां स्थितविषये तत्त्वमूचुस्तदीयं
तेन ब्रूमः सहृदयमनः प्रीतये तत्स्वरूपम्।।

(2) प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु।।

(3) काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।।

(4) शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते।
वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम्।।

(5) आलोकार्थी यथा दीपशिखायां यत्नवाञ्जनः।
तदुपायतया तद्वदर्थे वाच्ये तादृतः।।

(6) स्वसामर्थ्यवशेनैव वाक्यार्थं प्रतिपादयन्।
यथा व्यापारनिष्पत्तौ पदार्थो न विभाव्यते।।

(7) भक्त्याबिभर्ति नैकत्वं रूपभेदादयं ध्वनिः।

(8) मुख्यां वृत्तिं परित्यज्य गुणावृत्त्याऽर्थदर्शनम्।
यदुद्दिश्य फलं तत्र शब्दो नैव स्खलद्गतिः।।



www.sgbauonline.com